International Journal of Sanskrit Research 2024; 10(4): 205-209

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 205-209
© 2024 IJSR
www.anantaajournal.com
Received: 02-04-2024
Accepted: 06-05-2024

**अर्चना**
अतिथि प्राध्यापिका,
दौलतराम महाविद्यालय,
दिल्ली विश्वविद्यालय,
नई दिल्ली, भारत

**Corresponding Author:**
**अर्चना**
अतिथि प्राध्यापिका,
दौलतराम महाविद्यालय,
दिल्ली विश्वविद्यालय,
नई दिल्ली, भारत

# संस्कृत संस्कृतिश्च

## अर्चना

**प्रस्तावना**

संस्कृतस्य महिमां वयं भारतवासिनः पूर्णरूपेण न जानिमः। अस्यां सा संजीवनीशक्तिरस्ति यया मृतपाय शरीरेऽपि प्राणाः समायान्ति। किन्तु सा शक्ति तदैव उपयोगयोग्या भवति यदा सा तथैव शोधिता साधिता च भवेत् यथा हीरापन्ना- माणिक्यादि आभूषणान् शोधयित्वा साधयित्वा च चतुरः वैद्यो औषधरूपेण उपायोगं करोति।

संसारे अनादिकालादेव विद्वांस: नवीनवस्तूनाम् आविष्कारे अन्वेषणे च संलग्नाः सन्ति। अस्माकं पूर्वजानां ऋषिणां तपस्विनाश्च अनेकाः आविष्कारविधयः संस्कृतसाहित्यस्य भण्डारे निक्षिप्ताः सन्ति। यदि वयं तस्य साहित्यस्य महत्वं ज्ञात्वा तस्य संवर्धनाय संलग्नाः स्याम चेत् अद्य ज्ञाने वयं पाश्चात्यैः अग्रे गताः स्मः।

आधुनिकसमये विद्याभ्यासः ज्ञान-प्राप्त्यर्थं केचन जना: एव कुर्वन्ति। अधिकांशजना अर्थकारणाद् एव विद्याभ्यासं कुर्वन्ति। संस्कृतविद्या अद्य अर्थकारी विद्या नास्ति तथा च संस्कृतविदुषां संततिरपि संस्कृतं विहाय अन्येषु विषयेषु विद्याग्रहणं कुर्वन्ति। अतो अयं विचारणीयो विषयोऽस्ति यत् वयं इमां विद्यां प्रति जनानां श्रद्धारुचिश्च केन प्रकारेण प्रोत्साहितं कर्तुं शक्नुमः। अस्य प्रश्नस्य उत्तर वयं एवं दातुं शक्नुमः - अस्माभिः संस्कृतविद्यायाः अभ्यासः करणीय: यतः संस्कृतस्य भण्डारे अमूल्यानि रत्नानि सन्ति, अस्माकं संस्कृतेः सभ्यतायाश्च स्रोतः अस्मादेव निःसृतः।

संसारे सर्वेऽपि विद्वान्सः स्वीकुर्वन्ति यत् वेदा: सर्वतो प्राचीनतमाः ग्रन्थाः सन्ति। भारतीयैः धार्मिकभावनया वेदानामनादित्वं मन्यते, किन्तु ये विदेशिनः सन्ति ये च धार्मिकभावं न धारयन्ति तेऽपि मन्यन्ते यत् वेदाः प्राचीनतमाः ग्रन्थाः सन्ति। एवमेव अस्माकं देशस्य विद्वद्भिः सम्पूर्णे संसारे शिक्षायाः प्रचारः प्रसारश्च कृतः। यथा मनुस्मृततावपि कथ्यते –

> एतद् देश प्रसूतस्य सकाशादग्र जन्मनः।
> स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व मानवाः ।।

यदा भारतदेश: पराधीनोऽभूतः तदा पाश्चात्यैः विद्वद्भिः अस्माकं संस्कृतसाहित्यस्य भण्डार: दृष्टः तस्य च अमूल्यतायाः अनुमान: कृतः। तैः विद्वद्भिः स्वभाषासु संस्कृतग्रन्थानाम् अनुवादः कृतः। अनेकाश्च ग्रन्थाः स्वदेशस्य पुस्तकालयेषु प्रेषिताः। अद्य यूरोपस्य केचन संग्रहालयेषु एतावन्तः संस्कृत-प्राकृत-ग्रन्थाः सन्ति यावन्तः भारतस्य संग्रहालयेषु अपि न सन्ति। तेषां ग्रन्थानां आधारमुपरि एव तेषां भाषाविज्ञानस्य (Philology) निर्माणं नभूत्। संस्कृतस्याभ्यासानन्तरमेव तैः संस्कृत, फारसी, लातिनी इत्यादिनां भाषानां समवंशस्य

विषये ज्ञानमभूत्।

सस्कृत भाषायां सा शक्तिरस्ति यद् अद्यतनीय नूतनातिनूतनविचारा अपि तया व्यक्ताः भवन्ति। अद्यापि वयं यदा स्वविचारान् प्रकटयामः तदा संस्कृतस्यैव शरणं गच्छामः। अनया दृष्टया पाणिनेः कृतिः विचित्राऽस्ति। शब्दानामुच्चारणविज्ञानस्य संस्कृतेः यथा उन्नतिः जाताः अन्यस्यां कस्यामपि भाषायां न जाता । संस्कृतव्याकरणस्य सृष्टिरपि अनेन उच्चारणविज्ञानेनैव जाता। संस्कृतस्य वार्णमालानिर्माणं यावत् सूक्ष्मतया वैज्ञानिकतया चाभूत् न तथा अनस्याः कस्यापि भाषायाः । यावत्यः ध्वन्यः सन्ति तासां सर्वेषां कृते अक्षराणि अपि भवितव्यानि एकध्वन्यार्थञ्च एकैव अक्षरं भवेत्। अयं गुणः संस्कृतवर्णमालायामेव वर्तत अन्यस्यां कस्यामपि वर्णमालायां नास्ति। अयं चमत्कारः स्वयमेव न सञ्जातो अपितु विद्यायाः विधिपूर्वकाभ्यासेनैव एतादृशायाः परिपूर्णभाषायाः निर्माणं जातम्।

वर्णमालायाः वर्णान् व्यक्तकरणार्थं यानि चिन्हानि भवन्ति तान् लिपि इति कथयामः । पाश्चात्यविद्वान् भुल्लरमहोदयः कथयति यत् अस्माकं ब्राह्मी लिपि विदेशतः आगता आसीत्। केचन जनाः तस्य मतं स्वीकृतवन्तः । किन्तु महामहोपाध्याय पंडित हीराचन्द ओझा महोदयेन अकाट्य- प्रमाणैः अस्य मतस्य निर्मूलता सिद्धा कृता तथा च सिद्धं कृतं यत् अस्माकं लिपेः निर्माणं अस्माकं देशे अभूत्। प्रस्तरेषु धातुषु च पुरातनलेखाः प्राप्यन्ते तैः प्राचीनेषु स्तूपादिषु प्राप्तवस्तुषु, ताडपत्रेषु भोजपत्रेषु च अङ्काः अक्षराणि च उत्कीर्णानि सन्ति। येन सिद्धयति यत् अस्माकं पूर्वजान् प्राचीनकालादेव लिपेः ज्ञानम् आसीत्।

न केवलं लिपेः अपितु अस्माकं पूर्वजान् अङ्कानां ज्ञानमपि आसीत्। यथा सामवेदस्य पंचविंश- ब्राह्मणे यज्ञस्य दक्षिणानां विधानमस्ति- यत्र सर्वतः कनिष्ठा दक्षिणा 12 कृष्णल स्वर्णमस्ति एतदग्रे दक्षिणानां द्विगुणितं क्रमं ज्ञापितमस्ति यथा २४, ४८, ९६ ......३९३२१६ पर्यन्तम्।[1]

अपि च शतपथब्राह्मणेऽपि समयविभाजनविषये गणना प्राप्यते यथा- रात्रिदिवसयोः ३० मुहूर्त्ताः, एकस्य मूहूर्त्तस्य १५ क्षिप्राः, एकस्य क्षिप्रस्य १५ एतर्हि, एकस्य एतर्हे १५ इदानीं, एकस्य च इदानीं इत्यस्य १५ प्राणा : भवन्ति अर्थात् रात्रि- दिवसयोः (३०X१५ X १५ x १५ X १५) = १५,१८,७५० एतावन्तः प्राणाः भवन्ति।[2]

एतादृशीनां गुणाभागादिविधीनां ज्ञानं लिप्यङ्कयोः ज्ञानेन विना सम्भवं नास्ति । अतः लिप्यङ्कवर्णमालानां ज्ञानं अस्माकं देशे वैदिककालादेव उपलभ्यते। तथा च अस्माकं भाषाविज्ञानं व्याकरणशास्त्रञ्चापि उन्नतम् आसीत्। संस्कृतस्य वर्णमाला व्याकरणपद्धतिश्च अद्यापि संसारे पूर्णताया : उदाहरणं वर्तते।

भारतीयवाङ्मयस्य इतिहासः अत्यन्तगौरवपूर्णोऽस्ति। तस्य दिग्दर्शनमात्रमपि कठिनमस्ति, यतः भारतीयवाङमये वैदिककालादारभ्यः अधुना पर्यन्तं विभिन्नासु भाषासु लिखितानां ग्रन्थानां यदि सूचीनिर्माणं करिष्यामः चेत तेनैव एकस्य पुस्तकस्य निर्माणं भविष्यति। भारतस्य वाङ्मये वेदब्राह्मणोपनिषदादि संस्कृतगृन्थानामतिरिक्तं पालिवाङ्मयमपि विद्यते। न केवलं भारते अपितु –चीनी फारसी - अरबी इत्यादिषु विदेशीवाङ्मयेषु अपि भारतीय संस्कृते प्रभावः दृश्यते।

ए.बी.कीथ महोदयेन संस्कृतभाषाया अन्येषां देशानां साहित्यस्योपरि प्रभाव- विषये स्वपुस्तके लिखितम् यत् –

"संस्कृत ने द्रविड भाषाओं पर गहरा प्रभाव डाला है श्रीलंका भी उसके प्रभाव में आया है और सिंहली भाषा में उसके प्रभाव में विशिष्ट चिह्न दिखाई देते हैं। सुण्डाद्वीप, बोर्नियां और फिलीपींस में भी संस्कृत पहुंची और जावा में उसने कविभाषा की शक्ल में उल्लेखनीय विकास को जन्म दिया। इससे भी अधिक महत्त्व की बात थी संस्कृतग्रन्थो का मध्य एशिया में जाना और उनका चीन तिब्बत तथा जापान पर प्रभाव।"[3]

न केवलमस्माकं धार्मिकग्रन्थानाम् अपितु कथासंग्रहानामपि संसारे प्रचारः प्रसारश्च बाहुल्येन अभूत्। अस्यां दिशि पञ्चतन्त्रेण सर्वाधिका लोकप्रियता प्राप्ता। पञ्चतन्त्रस्यानुवादः सीरियाई अरवी- ग्रीक - इटालिन - जर्मन- स्लाव - हिब्रू- इत्यादिषु संसारस्य अनेकभाषासु प्राप्यते।

एतदतिरिक्तं जातककथा, महाभारतम्, बृहत्कथा इत्यादयोऽपि ग्रन्थाः संसारे समाद्रिताः सन्ति। एतेषां संस्कृतग्रन्थानां कथाः धर्मदेशसंस्कृतीनां सीमानामतिक्रमणं कृत्वा सम्पूर्णसंसारे स्वलोकप्रियतां प्रसारयितुं समर्थाः जाताः।

एतदतिरिक्तं नलदमयन्त्योः कथा लैटिन भाषायां अनुवादिता| श्लिगलमहोदयन इयं कथा पठित्वा लिथितं यत्-

"मेरी समझ में करुणा तथा भावमनोरमता की दृष्टि से और भावों की कोमलता और विमोहक दृष्टि से नल-दमयन्ती का आख्यान आद्वितीय है।"

एवमेव सत्यवानसावित्रेः कथाविषये सुप्रसिद्धेन विन्टरनित्समहोदयेन उक्तम् "चाहे जिस किसी ने सावित्री का काव्य रचा हो, चाहे वह कोई शूद्र रहा हो या ब्राह्मण,

[1] भारतीय प्राचीन लिपिमाला, पृष्ठ- १४४

[2] भारतीय प्राचीन लिपिमाला, पृष्ठ- १२२

[3] संस्कृत साहित्यस्येतिहासः, पृष्ठ – १९ - २०

वह अवश्यमेव सब कालों का कवि था। कोई महान कवि ही उत्कृष्ट महिला चरित्र को इतने मनमोहक और आकर्षक ढंग से चित्रित कर सकता है।"[4]

संस्कृतवाङ्मयस्य क्षेत्रम् एतावद् विस्तृतमस्ति यद् एकस्मिन् विषये एव सम्पूर्णं जीवनं गमिष्यति, तदापि तस्य पूर्णं ज्ञानं न भवेच्चेत् आश्चर्यं नास्ति।

न केवलं साहित्यस्य अपितु ज्योतिषशास्त्रस्य ज्ञानमपि भारते वैदिककालादेव वर्तते । वैदिकऋषीणां ध्यानं अंतरिक्षस्य घटनानां निरीक्षणे अपि आसीत्। अस्माकं बैदिकवाङ्मये अनेकानां स्पषट्टास्पष्ट-ज्योतिषविषयकसूचनानां संग्रहोऽपि उदाहरणार्थं सूर्यो वेदेषु दिवसरात्रिसंध्यानां कर्ता ऋतुणां च कारणं मन्यते। अन्यच्च ऐतरेय ब्राह्मणोऽपि लिखितम् – "अयं सूर्य नोदेति नास्तङ्गच्छति।"[5]

वैदिककालादेव सूर्यस्य वार्षिकी गति उत्तरायणे दक्षिणायने च विभाजिता भवति । वसंत संवते शरत् संवते च दिवसरात्र्योः समानता विषयेऽपि ते जानन्ति स्म। वर्षे सर्वतो दीर्घरात्र्यनन्तरं उत्तरायणस्य दीर्घदिवसानन्तरं च दक्षिणायनस्य आरम्भविषयेऽपि बाह्मणग्रन्थेषु उद्धृतम् ।

वर्षे द्वादशमासानां, त्रयाणां प्रमुखऋतुनां ३६० दिवसानाञ्च उल्लेखो ऋग्वेदे प्राप्यते।[6]

उत्तरवैदिककाले ज्योतिषशास्त्रस्य गणना वेदांगेषु कियते स्म। यज्ञानां तिथि-मुहूर्तानां ज्ञानार्थं ज्योतिषशास्त्रस्य आवश्यकता आसीत्। अत एव अस्मिन् काले अस्य विषयस्याध्ययनं व्यापकरूपेण क्रियते स्म। "दुर्भाग्यवशात् तत्काले रचिता: ज्योतिषग्रन्थाः सम्प्रति नोपलभ्यन्ते। किन्तु ब्राह्मणारण्यककल्पसूत्रादिग्रन्थेषु प्राप्तवचनसंदर्भानां माध्यमेन तस्मिन् काले ज्योतिषशास्त्रस्य ज्ञानविषयेऽनुमानं कर्तुं वयं समर्थाः स्म। उपलब्धाः ज्योतिषशास्त्रस्य ग्रन्थाः भाषाशैलीदृष्ट्या उत्तरवैदिककालानन्तरं रचिता इति प्रतीयन्ते किन्तु तेषां सामग्री-निश्चितरूपेण प्राचीना एव वर्तते।[7]

प्राप्तेषु ज्योतिषग्रन्थेषु आर्यभट्टस्य 'अर्थभट्टीय तन्त्र' इति रचना महत्वपूर्णाऽस्ति। आर्यभट्टस्य ग्रन्थस्य अध्ययनेन ज्ञायते यत् आर्यभट्टस्य जन्मत: पूर्वं ज्योतिषशास्त्रस्य अनेकविध सामग्री एकत्रिता जाता आसीत्। आर्यभट्टेन तस्या: सामग्रया: उचित-निरीक्षणेन आविष्काराणाम् च माध्यनेन तस्य ज्ञानस्य सरलीकरण- माध्यमेन च स्वग्रन्थे तद्विषये लिखितम्। आर्यभटस्य आविष्काराः ज्योतिषज्ञानं अग्रे नीतवन्तः। तेन निश्चितरुपेण ज्ञापितं यत् सूर्यः तारागणाश्च स्थिराः सन्ति, तेन पृथिव्याः परिधि ४९६७ योजनं यावत् निश्चिरूपेण ज्ञापिता तथा च तेन सूर्यचन्द्रमसोः ग्रहणस्य कारणानां वैज्ञानिकव्याख्या कृता।[8]

आर्यभट्टानन्तरं भास्कराचार्यस्य नामोल्लेख: क्रियते। तेन लीलावती, बीजगणित, ग्रहगणिताध्याय गोलाध्यायश्चेति चतुर्णां ग्रन्थानां रचना कृता। एतेषु प्रथमे द्वे गणितविषयेन अन्तिमे च ज्योतिष विषयेन सम्बन्धिते स्तः। गोलाध्याये भास्कराचार्येण पृथिव्याः गोलाकार विषये गुरुत्वाकर्षणशक्तिविषये च लिखितम्।

सः कथयति – "यतः पृथिवीयं आकर्षणशक्ति युक्ता वर्तते अत एव गुरूपदार्थान् स्वां प्रति आकर्षितं करोति।"[9]

आर्यभट्ट - वराहमिहिर - ब्रह्मगुप्त – भास्कराचार्येत्यादिनां विदुषां ग्रन्थेषु सौरचान्द्रमासानां निरुपणं, ग्रहगतेः निर्णयः, अयनांशविचारः, सौरराशिमण्डलः, आकाशे पृथिव्याः स्थितिः अक्षे च दैनिकगतिः, चन्द्रमसः भ्रमणं इत्यादिविषयाणां अतिसम्यक् प्रतिपादनं कृतमस्ति। एतेषां ग्रन्थानां अध्ययनं अद्यापि क्रियते तथा च पञ्चाङ्गनिर्माणे एतेषां ज्ञानस्य प्रयोगो क्रियते। अयमाश्चर्यस्य विषयमस्ति यत् दूरबीन इति यन्त्रस्य अभावेऽपि अस्माकं विद्धांसः केन प्रकारेण ग्रहनक्षत्राणाम् गति-विषये एतावत् सम्यक् ज्ञानस्य प्रतिपादनं कृतवन्तः।

संसारे ज्ञनस्य प्रत्येकस्मिन् क्षेत्रे भारतीयवाङ्मयस्य चिह्नानि सन्ति। यदि सृष्टेः उत्पत्यादि सम्बन्धीककल्पनानां विषये ज्ञातुमिच्छामश्चेत् दर्शनशास्त्राणि समुपस्थितानि भवन्ति। दर्शनेषु प्रथमः ग्रन्थः सांख्यदर्शनं वर्तते। अस्य दर्शनस्य नाम एव सांख्यमस्ति यतः अस्मिन् तत्वानां परिगणना वर्गीकरणञ्च क्रियते।

अस्माकं सर्वेषु दर्शनेषु पदार्थ - शक्ति – अणु - परमाणुसम्बन्धिनः विचारा: विद्यमानाः सन्ति। परमाणुनां स्वरुपस्य तेषाञ्च संघटन – विघटनयोः विशदं विवेचनं वैशेषिकदर्शने प्राप्यते यद् अतिसम्यक् विज्ञानसम्मतञ्चास्ति। वैशेषिकदर्शनं परमाणुनां नित्यत्वं अविनाशित्वञ्च मन्यते। त्रसरेणोः लम्बाई वराहमिहिरेण बालाग्रस्य ६४ तमः भाग: मन्यते। एकस्मिन् त्रसरेणुमध्ये ३० अथवा ६० परमाणवः मताः आसन्। एवं परमाण्वोः यत् परिमाणं भारते सर्वसम्मतमासीत् तद् 'हाइड्रोजन' इत्यस्य परमाणुनां अद्यतनीय परिमाणस्य अत्यन्तं निकटमस्ति । राजा भोजेन स्वकीय 'युक्तिकल्पतरु' नामके ग्रन्थे समुद्रगामीनां नावां तलेषु लौहस्य कील- योजनस्य निषेधः कृतः। यत: समुद्रस्य चुम्बकीय क्षेत्रे निमज्जनस्य आशंका भवति। समुद्रतरणार्थं

4 विन्टरनित्समहोदयस्य – "इण्डियन लिटरेचर"

5 ऐतरेय ब्राह्मण ३/४४

6 ऋग्वेद १/१६४/४८

7 कल्चरल हेरिटेज ऑफ इण्डिया, पृष्ठ - ३६२

8 कल्चरल हेरिटेज ऑफ इण्डिया, पृष्ठ - ३६२

9 मध्यकालीन भारतीय संस्कृति - पृष्ठ- १०५

अस्माकं नाविकाः मत्स्ययन्त्रस्यापि प्रयोगं कुर्वन्ति स्म। अस्य आकारं मत्स्यमिव भवति स्म अत एव अयं मत्स्ययन्त्रमिति कथ्यते स्म।

वैद्यकविद्यायाया अध्ययनमपि अस्माकं देशे प्राचीन कालादेव क्रियते। वैदिकवाङ्मयस्य आयुर्वेदे वयं शरीरविद्यायाः, गर्भविद्यायाः, स्वास्थ्यविज्ञानस्य च मूलं पश्यामः। मानवशरीरे कति अस्थीनि भवन्ति इति यथावत् संख्या अथर्ववेदे दत्तास्ति। अशोकस्य शिलालेखे भारतवर्षसिंहलातिरिक्तं ईरानतः यूनान तथा च लीबियापर्यन्तेषु देशेपु मनुष्यानां पशूनाञ्च चिकित्सालयानां निर्माणस्य तेषु च भारतीयचिकित्सकानां नियोजनस्य उल्लेखोऽस्ति।

भारतस्य औषधिविज्ञानस्य प्रचारः यूनान-देशेऽपि आसीत्। यूनानी औषधिविज्ञानस्य पिता हिपोक्रान्तस् महोदयेन मरीचिलौंग-अदरक-इत्यादिनाम् अनेक भारतीयानां औषधीनां प्रयोगविधयः अस्माकं शास्त्राणामनुसारेण ज्ञापिताः।[10]

अनुमानतः १२०० वर्षपूर्वं अरबभारतयोः मध्ये घनिष्ठः सम्बन्धः स्थापितः। तदा भारतीयवैद्याः अरबदेशेषु गताः तत्र च भारतीयग्रन्थानां अरबीभाषायां अनुवादः तैः कारितः। नालन्दाविश्वविद्यालयस्य चीनदेशीयैः विद्यार्थिभिः अस्माकं वैद्यकस्य ज्ञानं चीनदेशे गतम्।

वैद्यकविद्यायाः ज्ञानं अस्माकं पूर्वजैः वैज्ञानिकरीत्या गृहीतम्। वनस्पत्यतिरिक्तं धातूनां प्रयोगो वैद्यके कथं करणीयम् इत्यपि ते जानन्ति स्म। पारदस्य (पारा) गुणानां ज्ञानं यावत् तान् आसीत् तावत् पाश्चात्यविद्वांसोऽपि न जानन्ति स्म।

## संस्कृत वाङ्मये कला

भारतवासिनः केवलं विद्यायाः एव अभ्यासं न कुर्वन्ति स्म। तैः कलायाः उन्नतिः व्यापारस्य च वृद्धिरपि कृता। मूर्तिकला, चित्रकला, स्थापत्यकला, संगीतकला च प्रमुखाः कलाः सन्ति। भारतदेशे अधिकांशजनाः मूर्तिपूजकाः सन्ति। अत एव ईश्वराराधनार्थं मूर्तिकलायाः उद्भवो उन्नतिश्च आश्चर्यस्य वार्ता नास्ति।

मानवः · मुख्यतः द्वयोः उद्देश्ययोः मूर्तिनिर्माणं करोति एकस्तु सः अतीतस्य जीवन्ततां स्थापयितुमिच्छति। अन्यच्च सः अमूर्तस्य मूर्तत्वं स्थापयितुम् इच्छति। अन्येषु शब्देषु मूर्तिः चित्रस्य, कवितायाः संगीतस्य वा रूपपरिवर्तनं करणीयमिति अस्ति। अस्य प्राचीनतमोद्धरणानि मोहंजोदडो - हडप्पायाः प्राचीननगराणां ध्वंसावशेषेसु प्राप्तानि ।

एतदतिरिक्तं शैशुनकवंशस्य अनेकानां राज्ञां मूर्तयः सन्ति। एतासु सर्वतः प्राचीना अजातशत्रोः मूर्तिरस्ति। अजातशत्रोः मूर्तिः तस्य पौत्रस्य प्रप्रोत्रस्य च मूर्तयः बिहारस्य पटना पार्श्वे प्राप्ताः अधुना च एताः कलकत्तायाः संग्रहालये संगृहीताः सति। एताः तिस्रोऽपि मूर्तयः एकस्याः शैल्या एव सन्ति। एतासां शैली अतिविकसितास्ति । अस्यां शैल्यां वास्तविकतायाः बाहुल्यं वर्तते।[11]

अतः वयं कथयितुं शक्नुमः यत् संस्कृतं केवलं भाषा नास्ति अपितु अस्माकं देशस्य संस्कृतेश्च प्राणरूपेण अस्माकं लोमेषु व्याप्तास्ति ।

सारान्शः-

भाषा संस्कृतेः वाहिका भवति। भारतीयसंस्कृतेः वाहिका संस्कृतभाषा वर्तते। वयं सभ्यभारतीयाः तदैव भवितुं शक्नुमः यदा संस्कृतं धारयिष्यामः।

पाश्चात्याः सभ्यताःभौतिकवादिनः सन्ति पूर्वस्थाश्च सभ्यताः अध्यात्मवादिनः सन्ति, भारतस्य संस्कृतौ एतयोः उभयोः सम्मिश्रणं दृश्यते।

मैक्समूलर,विलियम जोन्स,फ्रोज़्ज़ इत्यादयः पाश्चात्यविद्वान्सोऽपि स्वीकुर्वन्ति यत् संस्कृतभाषा सर्वासां भाषाणां जननिरस्ति।संस्कृतभाषा परिपक्वा वैज्ञानिकभाषा वर्तते अस्माकं पूर्वप्रधानमन्त्रीः श्री जवाहर लाल नेहरू महोदयः कथयति – "भारत से यदि पूछा जाए कि उसका सबसे बडा खजाना क्या है तो वह संस्कृत साहित्य है"।

पाश्चात्यदेशैः अनेकाः विज्ञानविधाः स्वनाम्ना संसारे प्रसारिताः यासां भारतस्य संस्कृतग्रन्थेषु अतिप्राचीनकाले एव वर्णनमभूत्। यथा "पाइथागोरस थ्योरं" इति प्रमेयस्य अन्वेषणस्य श्रेयः यूनानी विद्वान पाइथागोरसमहोदयेन प्राप्तः।किन्तु अस्य प्रमेयस्य निरूपणं अस्माकं बौधायनशुल्वसूत्रे षष्ठ्यां शताब्द्यामेव कृतमासीत्। एवमेव "पेलियन समीकरण" इत्यस्य अन्वेषणस्य श्रेयः यूरोपीयगणितज्ञाः प्राप्तवन्तः, अस्य वर्णनं सप्तम्यां शताब्द्याम् अस्माकं ब्रह्मसूत्रे कृतमासीत्।

एवं सिध्यति यत् आधुनिकशिक्षाप्रणालिद्वारा इदं तथ्यमस्माकं मनसि अवस्थापितं यत् पाश्चत्यदेशा एव विज्ञानस्य प्रतिपादकाः सन्ति। किन्तु सत्यमिदमस्ति यत् भारतदेशः संस्कृतकारणात्, संस्कृतसाहित्यकारणात् स्वसन्स्कृतिकारणाच्च विज्ञानस्य अध्यात्मस्य च प्राचीनकालादेव पालको अस्ति।

अद्यापि भारते संस्कृतस्य महत्वं न्यूनं नास्ति।अस्माकं राजनेतारः संस्कृतभाषायां प्रतिज्ञाग्रहणं कुर्वन्ति।अस्माकं देशस्य – संसद, lic, नौसेना इत्यादिनां अनेकानां सर्वकारिसन्स्थानां ध्येयवाक्यानि संस्कृतग्रन्थैरेव गृहीतानि ।

अस्माकं संविधानस्य प्रथमानुच्छेदो अस्ति-

"India, that is bharat, shall be a union of states."

[10] हिन्दू एचीनमेन्ट इन एग्जैक्ट साइन्स, पृष्ठ - ५०

[11] भारतीय मूर्तिकला, पृथः - १३-१४

अत्र “India” इति आधुनिकतायाः सूचकमस्ति भारतश्च अस्माकं परंपरागतसंस्कृतेः सूचकःअस्यार्थो अयमस्ति यदस्माभिः Indiaतः भारतं प्रति गंतव्यमस्ति अर्थात् स्वप्राचीनसंस्कृतेः पुनः प्रचारः प्रसारश्च करणीयः।इदञ्च केवलं संस्कृतद्वारा एव भवितुं शक्यते।

**सन्दर्भग्रन्थसूची**


1. भारतीय प्राचीन लिपिमाला, द्वितीय संस्करण, अजमेर, १९ ८५,
2. संस्कृत साहित्य का इतिहास, मोतीलालबनारसीदास, दिल्ली।
3. पॉजिटिव साईंसिज आफ द एश्येन्ट हिन्दूज़, मोतीलाल बनारसीदास, दिल्ली।
4. एतरेय ब्राह्मण, आनन्दाश्रम प्रेस, पूना, १९७७।
5. वेदांग ज्योतिष, भूमिका, मैसूर,१९३६।
6. भारतीय मूर्तिकला, काशी, १९९६ ।
7. भारती का संविधान, द्विभाषीय संस्करण, CLP, २०१८ ।